## तौ सत् । (१२७/३१०६)

तौ शतृशानचौ सत्सञ्ज्ञौ भवतः । तौग्रहणमुपाध्यसंसर्गार्थम् । शतृशानज्मात्रस्य सञ्ज्ञा भवति । ब्राह्मणस्य कुर्वन् । ब्राह्मणस्य कुर्वाणः । ब्राह्मणस्य करिष्यन् । ब्राह्मणस्य करिष्यमाणः । सत्प्रदेशाः – 'पूरणगुणसुहितार्थसदव्ययतव्यसमानाधिकरणेन' (२. २. ११/७०५) इत्येवमादयः ॥

## पूङ्यजोः शानन् । (१२८/३१०८)

पूङो यजेश्च [1]धातोः शानन् प्रत्ययो भवति । पवमानः । यजमानः । यदि प्रत्ययाः शानन्नादयः न लादेशाः, कथं [2]सोमं पवमानः, नडमाघ्नानः इति षष्ठीप्रतिषेधः ? तृन् इति [3]प्रत्याहारनिर्देशात् । क्व संनिविष्टानां प्रत्याहारः ? 'लटः शतृशानचावप्रथमासमानाधिकरणे' (३. २. १२४/३१००) इत्यतःप्रभृति आ तृनो (३. २. १३५/३११५) नकारात् ।

[२७३] द्विषः शतुर्वा वचनम् ।

चौरस्य द्विषन्, चौरं द्विषन् ॥

## ताच्छील्यवयोवचनशक्तिषु चानश् । (१२९/३१०९)

ताच्छील्यं तत्स्वभावता । वयः[4] शरीरावस्था यौवनादिः । शक्तिः सामर्थ्यम् । ताच्छील्यादिषु[5] धातोः चानश् प्रत्ययो भवति । ताच्छील्ये तावत् – कतीह मुण्डयमानाः । कतीह भूषयमाणाः । वयोवचने – कतीह कवचं पर्यस्यमानाः । कतीह शिखण्डं वहमानाः । शक्तौ – कतीह निघ्नानाः । कतीह पचमानाः (म.भा. २. १३०) ॥

## इङ्धार्योः शत्रकृच्छ्रिणि । (१३०/३११०)

इङो धारेश्च [6]धात्वोः शतृप्रत्ययो भवति अकृच्छ्रिणि कर्तरि । अकृच्छ्रः सुखसाध्यो यस्य [7]कर्तुर्धात्वर्थः सोऽकृच्छ्री । अधीयन् पारायणम् । धारयन्नुपनिषदम् । अकृच्छ्रिणि इति किम् ? कृच्छ्रेण अधीते । कृच्छ्रेण धारयति ॥

## द्विषोऽमित्रे । (१३१/३१११)

अमित्रः शत्रुः । अमित्रे कर्तरि द्विषेर्धातोः शतृप्रत्ययो भवति । द्विषन्, द्विषन्तौ, द्विषन्तः । अमित्रे इति किम् ? द्वेष्टि भार्या पतिम् ॥

---

1. धातोः नास्ति फ. 2. सोऽयं ब. 3. प्रत्याहारनिर्देशग्रहणात् फ, प्रत्याहारः ब. 4. कालकृता इत्यधिकम् अ. ड. 5. गम्यमानेषु इत्यधिकम् अ. क. ड. फ. 6. धात्वोः नास्ति अ. क. फ. 7. कर्तुः नास्ति फ.